# શ્રીગોપાલલાલાષ્ટકમ્

shrIgopAlalAlAShTakam

sanskritdocuments.org

March 17, 2018

# shrIgopAlalAlAShTakam

# શ્રીગોપાલલાલાષ્ટકમ્

## Sanskrit Document Information

Text title : gopAlalAlAShTakam

File name : gopAlalAlAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka

Location : doc_vishhnu

Author : giridharajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# શ્રીગોપાલલાલાષ્ટકમ્

શ્રીમદાચાર્યચરણૌ સાષ્ટાઙ્ગં પ્રણિપત્યતૌ ।
વિરચ્યતેઽષ્ટકમિદં શ્રીમદ્ગોપાલપુષ્ટિદમ્ ॥ ૧॥

યસ્યાનુકમ્પાવશતઃ સુદુર્લભં
માનુષ્યમાપ્તં પરમસ્ય પુંસઃ ।
સર્વાર્થદં દીનદયાલુમેકં
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૨॥

યોઽદાત્સ્વસેવોપયિકં શરીરં
સાઙ્ગં સમર્થં શુભમર્થદં ચ ।
સેવાઽનભિજ્ઞઃ પરમસ્ય તસ્ય
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૩॥

નિજાઙ્ગસન્દર્શનયોગયોગ્યતા
યોઽદાદ્દૃશં મે પરમો દયાલુઃ ।
તદઙ્ગસૌન્દર્ય્યરસાવભિજ્ઞો
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૪॥

શ્રીમત્કથાસંશ્રવણોપયોગિ-
શ્રોત્રં દદૌ યઃ કરુણારસાબ્ધિઃ ।
કથામૃતાસ્વાદનમૂઢચેતા
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૫॥

વાચં દદૌ શ્રીગુણજ્ઞાનયોગ્યાં
વ્રજાઙ્ગનાઙ્ગાભરણાઙ્ગમૂર્તિમ્ ।
તથાપિ નામ્નામનુકીર્તનેઽલસો
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૬॥

ઘ્રાણેન્દ્રિયં મે તુલસીવિમિશ્ર-

પાદાઞ્જસન્દિગ્ધપરાગયોગ્યમ્ ।
દદૌ કૃપાલુર્હ્યપરાધિને યો
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૭॥

શિરશ્ચ પાદામ્બુજસન્પ્રણામ-
યોગ્યં દદૌ યો યદુવંશચન્દ્રઃ ।
સ્તુત્યા ચ નત્યા વિનયેન હીનો
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૮॥

જનોઽપરાધાનસકૃદ્ધિકુર્વન્
શ્રોતો ભવેદ્યસ્તુ મનાક્ષમાયામ્ ।
નવાલસસ્તં કરુણૈકબન્ધું
ગોપાલલાલં શરણં પ્રપદ્યે ॥ ૯॥

ઇતિ શ્રીમદ્ગોસ્વામિશ્રીગિરધરજીકૃતં
શ્રીગોપાલલાલાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIgopAlalAlAShTakam*
pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*